# सुन्दरकाण्ड षट्पञ्चाशः सर्गः (५६) - लङ्कातसमुत्पाटनम्

ततस्तु शिंशुपा मूले जानकीं पर्यवस्थिताम् ।
अभिवाद्या ब्रवीद् दिष्ट्या पश्यामि त्वा मिहाक्षताम् ॥ १ ॥

ततस्तं प्रस्थितं सीता वीक्षमाणा पुनः पुनः ।
भर्तृस्नेहान्वितं वाक्यं हनूमन्त मभाषत ॥ २ ॥

काममस्य त्वमेवैकः कार्यस्य परिसाधने ।
पर्याप्तः परवीरघ्न यशस्यस्ते बलोदयः ॥ ३ ॥

शरैः सुसङ्कुलां कृत्वा लङ्कां परबलार्दनः ।
मां नयेद्यदि काकुत्स्थस् तत्तस्य सदृशं भवेत् ॥ ४ ॥

तद्यथा तस्य विक्रान्त मनुरूपं महात्मनः ।
भवेदाहव शूरस्य तथा त्वमुप पादय ॥ ५ ॥

तदर्थोप हितं वाक्यं प्रश्रितं हेतु संहितम् ।
निशम्य हनुमांस् तस्या वाक्य मुत्तर मब्रवीत् ॥ ६ ॥

क्षिप्रमेष्यति काकुत्स्थो हर्यृक्ष प्रवरै र्वृतः ।
यस्ते युधि विजित्यारीन् शोकं व्यपनयिष्यति ॥ ७ ॥

एवमाश्वास्य वैदेहीं हनुमान् मारुतात्मजः ।
गमनाय मतिं कृत्वा वैदेही मभ्यवादयत् ॥ ८ ॥

ततः स कपि शार्दूलः स्वामि सन्दर्शनोत्सुकः ।
आरुरोह गिरि श्रेष्ठ मरिष्ट मरिमर्दनः ॥ ९ ॥

तुङ्ग पद्मक जुष्टाभिर् नीलाभिर् वनराजिभिः ।
सोत्तरीय मिवाम्भोदैः शृङ्गान्तर विलम्बिभिः ॥ १० ॥

बोध्यमान मिव प्रीत्या दिवाकर करैः शुभैः ।
उन्मिषन्त मिवोद्धूतैर् लोचनैरिव धातुभिः ॥ ११ ॥

तोयौघ निःस्वनैर् मन्द्रैः प्राधीत मिव सर्वतः ।
प्राधीत मिव विस्पष्टैर् नाना प्रस्रवण स्वनैः ॥ १२ ॥

देवदारुभि रत्युच्चै रूर्ध्व बाहु मिव स्थितम् ।
प्रपात जल निर्घोषैः प्राक्रुष्ट मिव सर्वतः ॥ १३ ॥

वेपमानमिव श्यामैः कम्पमानैः शरद्घनैः ।
वेणुभि र्मारुतोद्धूतैः कूजन्तमिव कीचकैः ॥ १४ ॥

निःश्वसन्त मिवामर्षाद् घोरैराशी विषोत्तमैः ।
नीहार कृत गम्भीरै र्ध्यायन्त मिव गह्वरैः ॥ १५ ॥

मेघपाद निभैः पादैः प्रक्रान्तमिव सर्वतः ।
जृम्भमाण मिवाकाशे शिखरै रभ्रमालिभिः ॥ १६ ॥

कूटैश्च बहुधा कीर्णैः शोभितं बहु कन्दरैः ।
सालतालाश्व कर्णैश्च वंशैश्च बहुभिर् वृतम् ॥ १७ ॥

लता वितानैर् विततैः पुष्पवद्भि रलङ्कृतम् ।
नाना मृग गणा कीर्णं धातु निष्यन्द भूषितम् ॥ १८ ॥

बहु प्रस्रवणो पेतं शिला सञ्चय सङ्कटम् ।
महर्षि यक्ष गन्धर्व किन्नरोरग सेवितम् ॥ १९ ॥

लता पादप सम्बाधं सिंहाध्युषित कन्दरम् ।
व्याघ्र सङ्घ समाकीर्णं स्वादु मूल फलोदकम् ॥ २० ॥

तमारुरोह हनुमान् पर्वतं पवनात्मजः ।
राम दर्शन शीघ्रेण प्रहर्षेणाभि चोदितः ॥ २१ ॥

तेन पाद तलाक्रान्ता रम्येषु गिरिसानुषु ।
सघोषाः समशीर्यन्त शिलाश् चूर्णी कृतास् ततः ॥ २२ ॥

स तमारुह्य शैलेन्द्रं व्यवर्धत महाकपिः ।
दक्षिणा दुत्तरं पारं प्रार्थयँल् लवणाम्भसः ॥ २३ ॥

अधिरुह्य ततो वीरः पर्वतं पवनात्मजः ।
ददर्श सागरं भीमं मीनोरग निषेवितम् ॥ २४ ॥

स मारुत इवाकाशं मारुतस्यात्म सम्भवः ।
प्रपेदे हरि शार्दूलो दक्षिणा दुत्तरां दिशम् ॥ २५ ॥

स तदा पीडितस् तेन कपिना पर्वतोत्तमः ।
ररास सह तैर्भूतैः प्रविशन् वसुधातलम् ॥ २६ ॥

कम्पमानैश्च शिखरैः पतद्भिरपि च द्रुमैः ।
तस्योरु वेगोन् मथिताः पादपाः पुष्प शालिनः ॥ २७ ॥

निपेतुर् भूतले रुग्णाः शक्रायुध हता इव ।
कन्दरोदर संस्थानां पीडितानां महौजसाम् ॥ २८ ॥

सिंहानां निनदो भीमो नभो भिन्दन्स शुश्रुवे ।
स्रस्त व्याविद्ध वसना व्याकुली कृत भूषणाः ॥ २९ ॥

विद्याधर्यः समुत्पेतुः सहसा धरणी धरात् ।
अतिप्रमाणा बलिनो दीप्तजिह्वा महाविषाः ॥ ३० ॥

निपीडित शिरोग्रीवा व्यवेष्टन्त महाहयः ।
किन्नरोरग गन्धर्व यक्ष विद्याधरास् तदा ॥ ३१ ॥

पीडितं तं नगवरं त्यक्त्वा गगन मास्थिताः ।
स च भूमिधरः श्रीमान् बलिना तेन पीडितः ॥ ३२ ॥

सवृक्ष शिखरो दग्रः प्रविवेश रसातलम् ।
दश योजन विस्तारस् त्रिशद् योजन मुच्छ्रितः ॥ ३३ ॥

धरण्यां समतां यातः स बभूव धराधरः ।
स लिलङ्घयिषुर् भीमं सलीलं लवणार्णवम् ।
कल्लोलास् फाल वेलान्त मुत्पपात नभो हरिः ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे
षट्पञ्चाशः सर्गः ॥ ५६ ॥